E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.320

केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# अलंकारशास्त्रे रससिद्धान्तः

**डा.उमेश झा**
**प्रधानाचार्यः**
**संस्कृतमहाविद्यालयःरोसड़ा**
**समस्तीपुर (बिहार)**
**दूरवाणी -9430049869,6201588696**
**umeshjha051266@gmail.com**

**शोधसारः**

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात्सारयति च।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते॥[1]

अनपेक्षितप्रसिद्धकारणमप्यपूर्वं वस्तु यत् सृजति, विस्तारयति च, यच्च स्वरसस्य माधुर्येण पाषाणकल्पमपि निष्प्राणं जगत् सारवदिव सम्पादयति, यच्च प्रतिभया वर्णनवैदग्ध्येन च सामान्यविषयमपि सहृदयहृदयहारिणं प्रकाशयति, सरस्वत्यास्तत् काव्यनामकं तत्त्वं यत्र कवीनां सहृदयानाञ्च परमाश्रयभूतं विराजते, तत् सर्वदा विजयी भवतु।

पृथिव्यां स्थलप्रदेशाः, जलप्रदेशाः, प्राणिजगत्, समग्रं विश्वं च स्वस्वविशिष्टसौन्दर्येण विभूषितम् अस्ति। एतत् प्राकृतिकं सौन्दर्यमीश्वरस्यैव सृष्टिः। कवेः प्रतिभया तदेव सौन्दर्यं पुनरधिकमनोज्ञरूपेण प्रकाश्यते। कवेर्लेखनीप्रभावेण मानवानां चित्तेषु सुखं दुःखं शोकः प्रेम क्रोधादयो विविधा भावाः सम्यगुद्बुध्यन्ते। काव्यसौन्दर्यसम्बद्धेषु बहुषु विषयेषु 'रसः' एव प्रमुखतत्त्वत्वेनास्मिन् प्रबन्धे निरूप्यते।

प्रथमं काव्यसम्बद्धानां कतिपयानां तत्त्वानां तथा आलङ्कारिकमतानुसारं काव्यसौन्दर्यप्रतिपादकानां षट्प्रस्थानानां तेषां चाचार्याणां संक्षिप्तः परिचयो प्रदेयः। ततः परं रसप्रस्थानस्य, रसस्वरूपस्य च विवेचनं, विभावानुभावव्यभिचारिभावानां परिचयः, अनन्तरं स्थायिभावस्य रसस्य च सम्बन्धनिरूपणम्, तथा रसतत्त्वप्रतिपादकानामाचार्याणां संक्षिप्तपरिचयः प्रदत्तः। अन्ते च भरतमुनेः प्रसिद्धं रससूत्रमाधारीकृत्य अन्येषामालङ्कारिकाणां मतानां संक्षिप्तं विवेचनमत्र प्रस्तुतम्।

**कूटशब्दाः**

निष्पत्तिः, रसः, रीतिः, वक्रोक्तिः, औचित्यम्, अनुमितिः, अभिव्यक्तिः, भुक्तिः, उत्पत्तिः।

**भूमिका**

काव्यम् इति पदं "कवेः कर्म" इत्यस्य विग्रहस्य आधारेण निष्पद्यते। अत्र कवि-शब्दात् कर्मण्यर्थे यत् (य्यञ्)-प्रत्ययविधानात् काव्य-शब्दस्य निष्पत्तिर्भवति। अतः काव्यम् इति पदस्य व्युत्पत्त्यर्थः "कवेः कर्म", अर्थात् कविना निर्मितं कर्म इति। अत्र यत् (य्यञ्)-प्रत्ययविधानस्य सूत्रम्—

'गुणवचनब्राह्मणादिभ्यः कर्मणि च[2]'

पुनश्च, काव्य-शब्दस्य प्रवृत्तिनिमित्तं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः समवायः। अत एव गुणालङ्कारविशिष्टौ शब्दार्थौ काव्यमिति व्यवह्रियते। अत्राचार्यः वामनः कथयति—

"काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते[3]"

काव्यशरीरविषये प्राचीनैरालङ्कारिकैर्द्विविधो मतभेदः परिलक्ष्यते। केचनाचार्याः केवलं शब्दमेव काव्यस्य शरीरमिति मन्यन्ते, अपरे तु शब्दार्थावुभावपि काव्यशरीरत्वेनाङ्गीकुर्वन्ति। ये केवलं शब्दमेव काव्यस्य शरीरमिति प्रतिपादयन्ति, तेषु आचार्यदण्डी, जगन्नाथः, विश्वनाथकविराजः, भोजराजः, जयदेवश्च प्रमुखाः। आचार्यदण्डिना काव्यादर्शे उक्तम्— "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली"[4] । पण्डितराजजगन्नाथेन रसगङ्गाधरे प्रतिपादितम्— "रमणीयार्थप्रतिपादकः शब्दः काव्यम्"[5]। विश्वनाथकविराजोऽपि साहित्यदर्पणे "वाक्यं रसात्मकं काव्यम्[6]" इति काव्यलक्षणं निर्दिशति। तथैव जयदेवस्य चन्द्रालोके, भोजराजस्य सरस्वतीकण्ठाभरणे (प्रथमपरिच्छेदे) च काव्यशरीरत्वेन शब्दस्यैव प्राधान्यमङ्गीकृतम्।

अथ च आचार्यभामहः कुन्तकश्च शब्दार्थावुभौ काव्यस्य शरीरमिति प्रतिपादयतः। भामहेन काव्यालङ्कारे उक्तम्— "शब्दार्थौ सहितौ काव्यम्"[7]। कुन्तकेन तु वक्रोक्तिजीविते प्रतिपादितम्— "शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि"[8] इति।

केवलं काव्यस्य शरीरसत्त्वेनैव न सहृदयस्य हृदये रसानुभूतिः सम्भवति। अतः काव्ये कश्चिदन्तर्निहितो विशेषधर्मोऽस्ति, येन तत् सहृदयहृदयहारि भवति। यथा शरीरमस्ति तथा तस्यात्माप्यस्तीत्येव मन्तव्यम्। काव्यात्मविषये सर्वप्रथममाचार्यवामनः रीतिमेव काव्यस्यात्मानम् अभ्यधात्। तेन काव्यालङ्कारसूत्रवृत्तौ स्पष्टमुक्तम्— "रीतिरात्मा काव्यस्य"[9]। एषा रीतिश्च त्रिविधा— वैदर्भी, गौडीया, पाञ्चाली चेति।

यथा काव्यस्वरूपनिर्णये आलङ्कारिकाणां मध्ये मतभेदः दृश्यते, तथैव कस्य विशेषस्य तत्त्वस्य काव्यसौन्दर्यवर्धने प्रमुखं स्थानमिति विषयेऽपि तेषां नानाविधा अभिप्रायाः सन्ति। केचन रीतिमात्मतया, केचन रसम्, अन्येऽलङ्कारम्, अपरे वक्रोक्तिम्, अन्ये ध्वनिमेव काव्यस्यात्मभूतं मन्यन्ते। एतेषां विविधानां मतानामाधारेण संस्कृतकाव्यशास्त्रे नानाविधानि सम्प्रदायानि अथवा प्रस्थानानि समुत्पन्नानि।

आलङ्कारशास्त्रे स्वीकृतानि प्रमुखानि षट् प्रस्थानानि सन्ति—

१. अलङ्कारप्रस्थानम्।
२. रीतिप्रस्थानम्।
३. रसप्रस्थानम्।
४. ध्वनिप्रस्थानम्।
५. वक्रोक्तिप्रस्थानम्।
६. औचित्यप्रस्थानम्।

एतान्यतिरिच्य विशेषतया उल्लेखनीयौ अन्यौ मतवादौ स्तः—

१. गुणप्रस्थानम्।

२. अनुमानप्रस्थानम् (महिमभट्टविरचितः व्यक्तिविवेकः)।

**१. अलङ्कारप्रस्थानम्**—

ये आलङ्कारिकाः काव्येऽलङ्कारस्यैव परमं महत्त्वमङ्गीकुर्वन्ति, तेषामेव मतमवलम्ब्य अलङ्कारप्रस्थानस्य विकासोऽभवत्। अस्य प्रस्थानस्य प्रमुखः प्रवर्तकः आचार्यभामहः। तेन विरचिते काव्यालङ्कारे अलङ्काराणां विस्तीर्णं निरूपणं कृतम्। अस्य प्रस्थानस्य द्वितीयाचार्यः उद्भटः, तस्य प्रमुखो ग्रन्थः अलङ्कारसारसङ्ग्रहः, तस्य टीका च लघुवृत्तिः इति प्रसिद्धा। अन्येऽपि प्रमुखग्रन्थाः रुद्रटविरचितः काव्यालङ्कारः तथा आचार्यदण्डिविरचितः काव्यादर्शः। तथापि दण्डिनः विशेषतः वैदर्भरीतेः समर्थकत्वात् तं शुद्धालङ्कारवादिनमपेक्ष्य रीतिविशिष्टालङ्कारवादिनमिति वक्तुं युक्ततरम्।

**२. रीतिप्रस्थानम्**—

रीतिवादिनोऽलङ्कारिकाः काव्ये रीतिमेव प्रधानतत्त्वत्वेन स्वीकुर्वन्ति। रीतिप्रस्थानसम्बद्धेषु ग्रन्थेषु आचार्यदण्डिनः काव्यादर्शः सर्वप्रथमं उल्लेखनीयः। आचार्यवामनस्य काव्यालङ्कारसूत्रवृत्तौ अपि रीतेः स्वरूपं, भेदाः, महत्त्वं च विस्तरेण निरूपितानि। विशेषतस्तेन “रीतिरात्मा काव्यस्य” इति सिद्धान्तः प्रतिष्ठापितः।

**३. रसप्रस्थानम्**—

ये आचार्याः काव्ये रसस्य सर्वातिशायिप्राधान्यमभ्युपगच्छन्ति, ते काव्यशास्त्रसमालोचनायां रसप्रस्थानिकाः इति प्रसिद्धाः। भरतमुनिप्रणीतस्य नाट्यशास्त्रस्य रसाध्यायेषु रसतत्त्वस्य विस्तीर्णं निरूपणं दृश्यते। नवमशताब्द्यां आचार्य आनन्दवर्धनेन एषः रससिद्धान्तः विशेषमहिम्ना प्रतिष्ठापितः। विश्वनाथकविराजविरचिते साहित्यदर्पणे, पण्डितराजजगन्नाथविरचिते रसगङ्गाधरे च रसस्य विस्तृतं विवेचनं विद्यते। वैष्णवाचार्यश्रीरूपगोस्वामिप्रणीतयोः भक्तिरसामृतसिन्धौ तथा उज्ज्वलनीलमणौ अपि भक्तिरसप्रधानतया रसतत्त्वस्य विशदं निरूपणमुपलभ्यते।

**४. ध्वनिप्रस्थानम्**—

आचार्य आनन्दवर्धनः स्वीये ध्वन्यालोके पूर्वाचार्याणां नानामतानि समीक्ष्य व्यञ्जनाशक्तिमेव, अथवा ध्वनिमेव, काव्यस्यात्मत्वेन प्रतिष्ठापितवान्। अभिनवगुप्तविरचिता लोचन-नाम्नी टीका ध्वन्यालोकस्य गूढतत्त्वानां सुबोधव्याख्यानरूपेण विशेषं महत्त्वं वहति।

**५. वक्रोक्तिप्रस्थानम्**—

संस्कृतालङ्कारशास्त्रे वक्रोक्तिप्रस्थानस्य प्रवर्तकत्वेन आचार्यकुन्तकः विशेषतया प्रसिद्धः। तेन विरचिते वक्रोक्तिजीविते वक्रोक्तिसिद्धान्तः सम्यक् प्रतिष्ठापितः। यद्यपि वक्रोक्ति इति पदस्य प्राचीनतमः प्रयोगः भामहस्य काव्यालङ्कारे दृश्यते, तथापि कुन्तकेन तस्य स्वातन्त्र्येण सम्पूर्णः सिद्धान्तः प्रतिपादितः। भामहस्य मते शब्दार्थयोर्वैदग्ध्यपूर्णप्रयोगेणैवालङ्काराणां निष्पत्तिर्भवति।

**६. औचित्यप्रस्थानम्**—

ध्वनिवादविरोधिषु प्रमुखेषु प्रस्थानेषु औचित्यप्रस्थानमेकम्। एकादशशताब्द्याः प्रसिद्ध आलङ्कारिकः क्षेमेन्द्रः अस्य प्रवर्तकत्वेन परिगण्यते। तेन विरचिते औचित्यविचारचर्चा-नामके ग्रन्थे औचित्यमेव काव्यस्य प्राणभूततत्त्वमिति सप्रमाणं प्रतिपादितम्।

**२. रसप्रस्थानं रसश्च**

संस्कृतसाहित्ये अलङ्कार-शब्दस्य व्यापकः प्रयोगः दृश्यते। सामान्यतः अलङ्कारः काव्यस्य शोभावर्धकः कश्चन विशेषोपस्कारः इति ज्ञायते। काव्यतत्त्वविदः आलङ्कारिकाः इति प्रसिद्धाः। केषाञ्चिदालङ्कारिकाणां मते रस एव काव्यस्य सौन्दर्यविधायकः प्रधानोपादानः, स एव काव्यस्यात्मा। रसप्रस्थानस्य प्रवर्तकत्वेन भरतमुनिः सर्वमान्यः। रस-शब्दस्य व्युत्पत्त्यर्थोऽलौकिकानन्दः। विश्वनाथकविराजः साहित्यदर्पणे काव्यलक्षणं निरूपयन् वदति— "वाक्यं रसात्मकं काव्यम्"[10]। अर्थात् रसरूपात्मविशिष्टं वाक्यमेव काव्यमिति।

भरतमुनिरपि नाट्यशास्त्रे रसतत्त्वं विवृण्वन् प्रसिद्धं रससूत्रमाह—

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः[11]।"

अर्थात् विभावानुभावव्यभिचारिभावानां संयोगेन रसस्य निष्पत्तिर्भवति।

विश्वनाथकविराजोऽपि साहित्यदर्पणस्य तृतीयपरिच्छेदे रससूत्रस्य व्याख्यानमकरोत्—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसनामेति रत्यादिः स्थायी भावः सचेतसाम्[12]॥

अस्य भावोऽयम्— विभावानुभावसञ्चारिभावैः प्रकाशितः रत्यादिः स्थायीभावः सहृदयानां चेतसि रसत्वमधिगच्छति।

सहृदयैः रसास्वादनस्य स्वरूपमपि विश्वनाथेनैवं प्रतिपादितम्—

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः[13]॥

अर्थात् सत्त्वगुणोद्रेकसम्भूतः, अखण्डः, स्वप्रकाशः, चिन्मयानन्दरूपः, अन्यवेद्यविषयस्पर्शरहितः, ब्रह्मानन्दसहोदरः, लोकोत्तरचमत्कारप्रधानश्च रसः सहृदयैः स्वात्माभिन्नत्वेनास्वाद्यते।

**३. विभावानुभावव्यभिचारिभावाः**

**(क) विभावः**

रसास्वादनस्य आन्तरङ्गोपादानानि स्थायिभावसञ्चारिभावौ, बाह्योपादानानि तु विभावानुभावौ। विभावः रसानुभूतेः कारणम्। लोके रतिशोकादीनां स्थायिभावानां ये कारणभूताः पदार्थाः सन्ति, ते एव काव्ये नाट्ये च प्रविश्य लौकिककारणत्वं परित्यज्य विभाव-संज्ञां लभन्ते। विश्वनाथकविराजः साहित्यदर्पणे विभावलक्षणमाह—

"रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः[14]।"

अर्थात् काव्ये नाट्ये च ये रत्यादीन् स्थायिभावानुद्बोधयन्ति ते विभावा इति कथ्यन्ते।

लक्ष्मीटीकायाम् अपि विभावस्य स्वरूपमिदं प्रतिपादितम्—

"वासनारूपतयाऽतिसूक्ष्मरूपेणावस्थितान् रत्यादीन् स्थायिनो विभावयन्त्यस्वादयोग्यतां नयन्ति इति विभावाः।"

अर्थात् अतिसूक्ष्मवासनारूपेण स्थितान् रत्यादीन् स्थायिभावान् ये रसास्वादनयोग्यान् कुर्वन्ति, ते विभावाः।

विभावौ द्विविधौ— आलम्बनविभावः तथा उद्दीपनविभावः।

नायकनायिकाप्रतिनायकादीनालम्ब्य यः रसात्मकश्चित्तविकार उत्पद्यते, स आलम्बनविभावः। साहित्यदर्पणे उक्तम्—

"आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमः।"

यैः पुनः रसस्योद्बोधनं, प्रकाशनं वा भवति, ते उद्दीपनविभावाः। विश्वनाथः तेषां लक्षणमाह—

"उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये।
आलम्बनस्य चेष्टाद्या देशकालादयस्तथा[15]॥

अर्थात् नायकनायिकादीनामङ्गविक्षेपाः, चेष्टाः, देशः, कालः, वातावरणं च उद्दीपनविभावतया परिगण्यन्ते।

**(ख) अनुभावः**

लौकिकचित्तवृत्तेः उत्पत्तेः अनन्तरं ये बाह्यविकाराः प्रादुर्भवन्ति ते अनुभावाः इति कथ्यन्ते। आलङ्कारिकाणां मते आलम्बनोद्दीपनविभावाभ्यामुद्बुद्धानां रत्यादिस्थायिभावानामनुमापकानि कार्याणि यदा काव्ये नाट्ये च प्रविशन्ति, लौकिकत्वं विहाय काव्यप्रतिभया लोकोत्तरत्वं प्राप्नुवन्ति, तदा तान्यनुभावसंज्ञां लभन्ते।

साहित्यदर्पणे अनुभावलक्षणमिदं प्रतिपादितम्—

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।

लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्धयोः[16]॥

स्वस्वकारणैः प्रेरिताः सन्तो ये भावाः नायकनायिकादिषु बहिर्भावेन प्रकाशन्ते तथा स्थायिभावानामनुमापककार्यरूपेण दृश्यन्ते, ते अनुभावाः इति कथ्यन्ते।

अनुभावानां प्रमुखाः प्रकाराः सात्त्विकभावाः इति प्रसिद्धाः। ते यथा—

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः[17]॥

अर्थात् स्तम्भः, स्वेदः, रोमाञ्चः, स्वरभङ्गः, वेपथुः, वैवर्ण्यम्, अश्रु तथा प्रलयः—इमे अष्टौ सात्त्विकानुभावाः परिगण्यन्ते।

**(ग) व्यभिचारिभावाः**

रसास्वादे सहायकरूपेण वर्तमानाः, विभावानुभावाभ्यां भिन्नाः, ये भावाः स्थायिभावमाश्रित्य कदाचिदाविर्भवन्ति पुनस्तिरोभवन्ति च, ते व्यभिचारिभावाः इति कथ्यन्ते। विश्वनाथकविराजः साहित्यदर्पणे तेषां लक्षणमाह—

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिमग्नास्त्रयस्त्रिंशच्च तद्भिदाः[18]॥

अर्थात् ये भावाः स्थायिभावमभिमुखीकृत्य कदाचिदुत्पद्यन्ते, पुनस्तस्मिन्नेव निमज्जन्ति, ते व्यभिचारिभावाः। तेषां संख्या त्रयस्त्रिंशत् (३३) इति स्वीकृता।

ते च—

निर्वेदावेगदैन्यश्रममदजडतौग्र्यमोहविबोधाः।
स्वप्नापस्मारमरणमलसतामर्षनिद्रावहित्थाः॥
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिताः व्याधिसन्त्रासलज्जाः।
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः[19]॥

रूपकेषु दृश्यकाव्येषु वा नायकनायिकादयः तथा तेषां परिवेशः विभावाः, तेषामभिनयः अनुभावः, तथा निर्वेद, आवेग, श्रमादयः ये भावाः सहसोत्पद्य क्षणेनैव विलीयन्ते, ते व्यभिचारिभावाः इति कथ्यन्ते। एते भावाः सहृदयचित्ते रत्यादीन् स्थायिभावान् जागरयन्ति; तेषामास्वादनेनैव रसस्य निष्पत्तिर्भवति।

**४. स्थायिभावः रसश्च**

विश्वनाथकविराजः साहित्यदर्पणे स्थायिभावलक्षणमिदं प्रतिपादयति—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः[20]॥

अर्थात् अविरुद्धैर्विरुद्धैर्वा भावैः यो न तिरस्क्रियते, यश्च रसास्वादस्य बीजरूपोऽङ्कुरभूतश्च भवति, स एव स्थायिभावः इति परिगण्यते।

विश्वनाथस्य मते स्थायिभावाः नव सन्ति। ते यथा—

रतिर्हासश्च शोकश्च क्रोध उत्साह एव च।
भयं जुगुप्सा विस्मयः शमश्चेति नव स्मृताः[21]॥

अर्थात् रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयम्, जुगुप्सा, विस्मयः, शमश्च—इमे नव स्थायिभावाः।

विश्वनाथकविराजस्य मते रसानामपि संख्या नवैव। साहित्यदर्पणे तेषां निर्देशः—

श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः[22]॥

अर्थात् श्रृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः तथा शान्तः—इमे नव रसाः प्रसिद्धाः।

भरतमुनिना नाट्यशास्त्रे आदौ अष्टरसाः प्रतिपादिताः; परवर्तीष्वाचार्येषु शान्तरसोऽपि नवमरसत्वेन स्वीकृतः। अपि च बहवः कवयः करुणरसमेव सर्वेषु रसेषु श्रेष्ठतमं मन्यन्ते।

**५. रसतत्त्वप्रतिपादकाचार्याः**

रससरस्वत्याः मन्दिरे सुवर्णदीपप्रज्वालनस्य श्रेयः सर्वप्रथमं भरतमुनये एव दातव्यम्। तेन प्रतिपादितं प्रसिद्धं रससूत्रम्—

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः[23]।"

इदं सूत्रं परवर्तिभिरालङ्कारिकैः नानादृष्टिकोणैः नानाविधरीत्या व्याख्यातम्। वस्तुतः एतदेव भरतसूत्रं सम्पूर्णरसमीमांसाया मूलाधारभूतमस्ति।

अस्य सूत्रस्य प्रथमो व्याख्याता भट्टलोल्लटः। स सम्भवतः अष्टमशताब्द्यां जातः। तन्मतस्य समीक्षां कृत्वा शङ्कुकः स्वकीयभाष्ये नवीनं सिद्धान्तं प्रतिष्ठापितवान्। शङ्कुकः भुवनाभ्युदय-नामकाव्यस्यापि रचयिता आसीत्। स नवमशताब्द्याः पूर्वार्धे वर्तमान इति मन्यते। ततो भट्टनायकः दशमशताब्द्याः पूर्वार्धे रसतत्त्वस्य नूतनं विवेचनं कृतवान्। अनन्तरम् आचार्याभिनवगुप्तः रसमीमांसायामभिनवं प्रकाशमानीय तस्याः स्वरूपं सम्यग् व्यवस्थितवान्। अभिनवगुप्तस्य साहित्यसेवाकालः प्रायः ९८०–१०३० ईस्वीयवर्षपर्यन्तः स्वीकृतः।

रसास्वादनप्रक्रियायाः विषये अभिनवगुप्तेन प्रदर्शितः मार्गः परवर्तीभिरालङ्कारिकैः श्रद्धया स्वीकृतः। तेषु विशेषतया मम्मटभट्टः, विश्वनाथकविराजः, पण्डितराजजगन्नाथश्च उल्लेखनीयाः। जगन्नाथस्य रसगङ्गाधरम् अवलोकयतः ज्ञायते यत् अभिनवगुप्तस्य सिद्धान्तः व्यापकस्वीकृतिमवाप्तोऽपि नव्यसमालोचकानां तीक्ष्णविमर्शात् पूर्णतया मुक्तो नाभवत्। स्वयं जगन्नाथः नव्यमत-नाम्ना किञ्चन नवीनमतमुदाहरति; तथापि तेन तद् मतं नाङ्गीकृतम्।

### ६. आलङ्कारिकानां चत्वारः प्रमुखाः सिद्धान्ताः

भरतमुनिप्रोक्तं "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति रससूत्रं परवर्तिष्वालङ्कारिकेषु महान् विचारविमर्शमजनयत्। विशेषतः "संयोग" तथा "निष्पत्ति" इत्येतयोः पदयोः अर्थनिर्णये नानामतभेदाः समजायन्त। एतस्यैव सूत्रस्य व्याख्यानक्रमेण भट्टलोल्लटस्य उत्पत्तिवादः, शङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादः चेति चत्वारः प्रमुखाः सिद्धान्ताः प्रसिद्धिमुपगताः।

**(क) भट्टलोल्लटस्य उत्पत्तिवादः**

अभिनवगुप्तविरचितायाम् अभिनवभारत्याम् अनेकवारं भट्टलोल्लटस्य उल्लेखः प्राप्तः। भरतसूत्रस्य यद् व्याख्यानं तेन कृतं तत् उत्पत्तिवादः इति नाम्ना प्रसिद्धम्। नाम्नः आधारात् स काश्मीरदेशीय आलङ्कारिक इति प्रतीयते। पी. वी. काणे-महोदयेन तस्य कालः प्रायः ८००–८४० ईस्वीयवर्षेषु निर्दिष्टः। माणिक्यचन्द्रसूरिणा उक्तं यत् भट्टलोल्लटस्य रसविवरण-नामकग्रन्थात् रसविषयकविस्तृतविवरणं ज्ञायते।

भट्टलोल्लटस्य मते रसः न सहृदयस्य चित्ते, न कवेः अन्तःकरणे, नापि रामसीतादिचरित्राणामनुकरणं कुर्वतां नटनटीनामन्तःकरणे जायते। अपि तु काव्ये नाट्ये वा वर्णितेषु मूलनायकनायिकादिषु—यथा रामः, सीता, दुष्यन्तः, शकुन्तला, युधिष्ठिरः, द्रौपदी च—एव रसस्योत्पत्तिर्भवति। अतः भरतसूत्रस्थस्य "निष्पत्ति"-पदस्यार्थः तेन उत्पत्तिः इति स्वीकृतः। उत्पत्तिरत्र अभूतपूर्वस्य भावस्य प्रादुर्भावः। अतः पूर्वमविद्यमानो रत्यादिस्थायिभावः विभावानुभावव्यभिचारिभावैः उत्पद्यते इति तस्याभिप्रायः। रत्यादिस्थायिभावानां चिन्ता, ग्लानि, दैन्य, उद्वेगादिभिः व्यभिचारिभावैः पोष्यपोषकसम्बन्धोऽस्तीत्यपि स प्रतिपादयति।

किन्तु अयं सिद्धान्तः परवर्तीभिः बहुभिः आलङ्कारिकैः न स्वीकृतः। यदि विभावादयः रसस्य निमित्तकारणत्वेन स्वीक्रियेरन्, तर्हि निमित्तकारणस्य विनाशेऽपि कार्यस्य स्थितिः स्यात्; परन्तु विभावाद्यभावे रसोऽपि नावतिष्ठते। अतः ते रसस्य न निमित्तकारणानि, नापि ज्ञापककारणानि भवितुमर्हन्ति। ज्ञापककारणत्वे हि ज्ञेयवस्तुनः पूर्वसिद्धिरपेक्ष्यते। अतः रसः कदापि विभावादीनां कार्यरूपेण नोपपद्यते इति परवर्तिसमालोचकानां निष्कर्षः।

**(ख) भट्टशङ्कुकस्य अनुमितिवादः**

अभिनवगुप्तेन विरचितायाम् अभिनवभारत्यां भट्टशङ्कुकस्य बहुशः उल्लेखः कृतः। शार्ङ्गधरपद्धत्याः प्रमाणेन ज्ञायते यत् भट्टशङ्कुकः सूर्यशतक-प्रणेता मयूरस्य पुत्रः आसीत्। स प्रायः नवमशताब्द्याः पूर्वार्धे अवतीर्णः। राजतरङ्गिण्याम् अपि स काश्मीरराज्ञः अजितापीडस्य समकालिकः तथा भुवनाभ्युदय-महाकाव्यस्य रचयिता इति निर्दिष्टः।

न्यायदर्शनस्य आधारमवलम्ब्य भट्टशङ्कुकः भरतसूत्रस्थस्य "निष्पत्तिः" इति पदस्य अनुमितिः इत्यर्थं स्वीकृतवान्। तस्य मते रसः अनुमेयः, विभावानुभावव्यभिचारिभावाश्च तस्य अनुमापकाः। यथा धूमः वह्नेरनुमापकः, वह्निश्च अनुमेयः, तथैव विभावादयः रत्यादिस्थायिभावस्य ज्ञापकाः भवन्ति। अतः विभावानुभावव्यभिचारिभावानां रसस्य च अनुमापकानुमेयभावसम्बन्धः स्वीकर्तव्यः।

तस्याभिप्राये न रामादीनामनुकार्यचरित्राणां प्रत्यक्षं रसानुभवः, नापि नटस्य; अपि तु सहृदयः सामाजिक एव नटस्याभिनयं दृष्ट्वा तस्मिन् रत्यादिस्थायिभावान् अनुमानतः अनुभवति। अतो रसानुभूतिः अनुमानजन्या भवतीति शङ्कुकस्य सिद्धान्तः।

यद्यपि अयं सिद्धान्तः भट्टलोल्लटस्य उत्पत्तिवादात् अधिकं परिष्कृतः, तथापि स समालोचनातीतो नाभवत्। काव्यप्रकाशस्य प्रदीपटीकायाम् उक्तम्—

"एतदहृदयग्राही; यतः प्रत्यक्षमेव ज्ञानं सचमत्कारं, नानुमित्यादिः[24]।"

अर्थात् चमत्कारजनकं ज्ञानं प्रत्यक्षमेव भवति, न तु केवलमनुमानम्। अपरं च नटः रामदुष्यन्तादीन् प्रत्यक्षतया कदापि न दृष्टवान्; अतः तेषां विशेषतः तेषामन्तःस्थितानां रत्यादिस्थायिभावानामनुकरणं तेन कर्तुमशक्यमिति शङ्कुकमतस्य दोषो निर्दिष्टः।

**(ग) भट्टनायकस्य भुक्तिवादः**

रससूत्रस्य परिष्कृतव्याख्यानं भट्टनायकेन प्रदत्तम्। तस्य मतं भुक्तिवादः इति नाम्ना प्रसिद्धम्। भट्टलोल्लटशङ्कुकयोर्मताभ्यां तुलनायां भट्टनायकस्य सिद्धान्तः अधिकः परिपक्वः, दार्शनिकश्च।

सः अभिधा, भावकत्वम्, भोजकत्वम् चेति त्रिभिः व्यापारैः रसतत्त्वं निरूपितवान्। अभिधाशक्त्या सामाजिकः श्रव्यदृश्यकाव्ययोः प्रतिपादितमर्थं बोधयति। ततः स्थायिभावविभावानुभावव्यभिचारि-भावानां ज्ञानमुत्पद्यते।

येन व्यापारेण काव्यवर्णितानां रामदुष्यन्तादीनां विशेषत्वं निवर्त्य ते सार्वत्रिकस्वरूपं प्राप्नुवन्ति, तं व्यापारं भट्टनायकः भावकत्वम् अथवा साधारणीकरणम् इति निर्दिशति। नाट्यदर्शने कविप्रतिभया समन्वितं वस्तु, दोषरहितगुणालङ्कारयुक्ता भाषा, नटनटीनां चतुर्विधाभिनयः, गीतवाद्यनृत्यसमन्वितं प्रस्तुतीकरणं च साधारणीकरणस्य साहाय्येन रसानुभूतिं जनयति।

अस्यैव सिद्धान्तस्य समर्थनार्थं तेनोक्तम्—

"तस्मात् काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन, नाट्ये चतुर्विधाभिनयरूपेण निविडनिजमोहसङ्कटतानिवारणकारिणा विभावादिसाधारणीकरणात्मनाभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसः[25]।"

तथापि अस्य सिद्धान्तस्यापि केचन दोषाः निर्दिष्टाः। यदि साधारणीकरणमात्रेण रत्यादयः स्थायिभावाः सहृदयस्य चित्ते समुत्पद्येरन्, तर्हि वासनारहितोऽपि जनः रसानुभवं कुर्यात्। किन्तु तदसंभवम्। अभिनवगुप्तेनापि उक्तम्—

"सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः[26]॥"

अर्थात् येषां चित्ते संस्काररूपा वासना विद्यते, ते एव रसास्वादनयोग्याः; वासनाशून्याः जनाः काष्ठशिलातुल्या एव भवन्ति।

**(घ) अभिनवगुप्तस्य अभिव्यक्तिवादः**

अभिनवगुप्तस्य सिद्धान्तः अभिव्यक्तिवादः इति प्रसिद्धः। तस्य मते स्थायिभावः अभिव्यङ्ग्यः, विभावादयश्च अभिव्यञ्जकाः। विभावानुभावव्यभिचारिभावानां साहाय्येन सहृदयस्य हृदये सुप्तावस्थायां स्थितः स्थायिभावः अभिव्यक्तिं प्राप्नोति, न तु नूतनतया जायते।

अभिनवगुप्तः बौद्धयोगाचारदर्शनस्य—

“यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते[27]।”

इति सिद्धान्तमाश्रित्य रसस्य व्याख्यानं करोति। तस्य मते दृश्यमानं बाह्यजगत् वस्तुतः सहृदयस्य चैतन्ये प्रतिबिम्बितमेव। अतः नटेन प्रदर्शिताः रामदुष्यन्तादयः, विभावादयश्च सहृदयस्य अन्तःकरणे विद्यमानान् संस्कारान् व्यञ्जयन्ति; ततो रसानुभूतिः सम्भवति।

अतः भरतसूत्रस्थस्य “निष्पत्तिः” इति पदस्यार्थः अभिव्यक्तिः, “संयोगः” इति पदस्यार्थश्च अभिव्यञ्जकाभिव्यङ्ग्यसम्बन्धः इति तेन प्रतिपादितम्। रतिशोकविस्मयादयः स्थायिभावाः विभावादीनामुपकारेण सहृदयहृदये प्रकाशमानाः सन्तः आनन्दरूपेण रसत्वमधिगच्छन्ति।

अभिनवगुप्तस्यायमभिव्यक्तिवादः परवर्तिभिरालङ्कारिकैः सर्वाधिकं सम्यक्, युक्तिसंगतं च मन्यते। मम्मटः, विश्वनाथकविराजः, पण्डितराजजगन्नाथश्च अस्य सिद्धान्तस्य मूलभावं स्वीकृतवन्तः। यद्यपि कतिपयैः नव्यालोचकैरस्य विषये समालोचना कृता, तथापि रसमीमांसाक्षेत्रे अभिनवगुप्तस्य अभिव्यक्तिवाद एव सर्वाधिकं प्रभावशाली तथा ग्राह्यः सिद्धान्त इति सामान्यतः स्वीकृतम्।

**उपसंहारः**

भरतमुनिना स्वीये नाट्यशास्त्रे सर्वप्रथमं रसनिष्पत्तेः सिद्धान्तः प्रतिपादितः। तस्य प्रसिद्धस्य रससूत्रस्य व्याख्याने परवर्तिनो बहवोऽलङ्कारिकाः स्वस्वमतानि प्रतिष्ठापितवन्तः। रसशास्त्रपरम्परायां उत्पत्तिवादः, अनुमितिवादः, भुक्तिवादः, अभिव्यक्तिवादः चेति चत्वारः प्रमुखाः सिद्धान्ताः प्रसिद्धाः।

भट्टलोल्लटस्य मते विभावानुभावव्यभिचारिभावानां संयोगेन रसस्योत्पत्तिर्भवति। भट्टशङ्कुकस्य अनुमितिवादे तु सामाजिकस्य सहृदयस्य रसास्वादनमेव विशेषतया प्रतिपादितम्। भट्टनायकस्य भुक्तिवादः तथा अभिनवगुप्तस्य अभिव्यक्तिवादश्च रसमीमांसायां विशेषं स्थानं भजतः।

रसप्रस्थानानुयायिनामालङ्कारिकाणां मते रस एव काव्यस्य मूलभूत आत्मतत्त्वम्, अपरे तु सर्वेऽपि विभावानुभावव्यभिचारिभावादयः तस्योपकारकाः बाह्योपादानभूताश्च। कवेः हृदये समुत्पन्नया रसानुभूत्या काव्यस्य जन्म भवति, सहृदयसामाजिकस्य हृदयस्थितेन रसानुभवेन तस्य परिपूर्णता सम्पन्ना भवति।

यथा बीजात् वृक्षः, वृक्षात् पुष्पम्, पुष्पात् फलं च जायते, तथैव समग्रस्य विकासक्रमस्य मूलकारणं बीजमेव भवति। एवं दृश्यकाव्ये श्रव्यकाव्ये च रस एव मूलभूतं तत्त्वम्, अन्ये सर्वे भावाः तस्मिन्नेव प्रतिष्ठिताः, तमेव परिपोषयन्ति च। अतो हि नाट्यशास्त्रे उक्तम्—

यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं तथा।
तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः॥[28]

अत एव रसः काव्यजीवनस्य प्राणः, सहृदयानन्दस्य परमाधारश्च इति निःसंशयं स्वीकर्तुं शक्यते।

**टिप्पणी**

[1] ध्वन्यालोकः, (लोचनटीकायाः मङ्गलाचरणम्)

[2] अष्टाध्यायी(५.१.१२८)
[3] काव्यालङ्कारसूत्रम्(प्रथमसूत्रवृत्तिः)
[4] काव्यादर्शः (१.१०)

[5] रसगङ्गाधरः(पृ.८)
[6] साहित्यदर्पणः(पृ.२८)
[7] काव्यालङ्कारः (१.१६)

[8] वक्रोक्तिजीवितम् (१.७)

[9] काव्यालङ्कारसूत्रवृत्तिः (१.२.६)
[10] साहित्यदर्पणः()
[11] नाट्यशास्त्रम् (पृ.२२८)
[12] साहित्यदर्पणः (३.१)
[13] साहित्यदर्पणः(३.२)
[14] साहित्यदर्पणः(३.३३)
[15] साहित्यदर्पणः(३.१३४-१३५)
[16] साहित्यदर्पणः(३. १३६)
[17] साहित्यदर्पणः(३.१३९)
[18] साहित्यदर्पणः(३. १४१)
[19] साहित्यदर्पणः(३. १४२)
[20] साहित्यदर्पणः(३. १७७)
[21] साहित्यदर्पणः(३. १७९)
[22] साहित्यदर्पणः(३.१८२)
[23] नाट्यशास्त्रम्(पृ.२२८)
[24] काव्यप्रकाश(प्रदीपटीका)
[25] भारतीय काव्यशास्त्र एवं रस सिद्धान्त(पृ.१४९)
[26] साहित्यदर्पणः(पृ.९९)
[27] परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः।
ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः॥
यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते।(सौत्रान्तिकवौद्धाः)
[28] नाट्यशास्त्रम्(६.३९)

**सन्दर्भग्रन्थसूची**


१. रसगङ्गाधरः (प.रा जगन्नाथः),प.श्रीनारायणमिश्रः एवं शशिनाथ झा, चौखम्बा कृष्णदास अकादमी, वाराणसी,उ.प्र. २००८।

२. काव्यप्रकाशः (मम्मटः),रामानन्दाचार्यः,संस्कृत पु.भा.,कोलकाता, ब.१४२२।

३. काव्यमीमांसा,(राजशेखरः),डॉ.उदयचन्द्रवन्दोपाध्यायः,सं.वु.डि.,कोलकाता, २०२२।

४. वक्रोक्तिजीवितम् (कुन्तकः), राधेश्याममिश्रः,चौखम्भा संस्कृत संस्थानम्,वाराणसी, वि.सं २०५५।

५. श्रीभक्तिरसामृतसिन्धुः,(श्रीरूपगोस्वामी), श्रीधरदेवगोस्वामी, श्रीचैतन्यसारस्वतकृष्णा-नुशीलनसङ्घः, नवद्वीपः, बङ्ग.१३९६।

६. उज्ज्वलनीलमणिः (श्रीरूपगोस्वामी), श्रीरामनारायणविद्यारत्नः, राधारमणप्रेस्, बहरमपुरम्, बङ्ग.१२९६।

७. साहित्यदर्पणम् (विश्वनाथः), डॉ.विमलाकान्तमुखोपाध्यायः, संस्कृतपुस्तकभाण्डार, कोलकाता ब.१३६७।

८. नाट्यशास्त्रम्, भरतमुनिः, श्रीबाबुलाल शुक्ल, चौखम्भा संस्कृत संस्थान्, वाराणसी, वि.सं. २०४०।

९. काव्यालङ्कारसूत्रवृत्तिः, आचार्यवामनः, श्रीकृष्णमुरिः, श्रीवाणीविलासमुद्रणालयः, श्रीरङ्गनगरम्, १९०९।

१०. भारतीय काव्यशास्त्र एवं रस सिद्धान्त, नीतिका, Booksclinic Publishing, Bilaspur, Chhattisgarh, 2025.